दिनाङ्कः—२०१०.०६.१०

सायम्—०६.१०

प्रवाचकः/अनुवादक – बलदेवानंदसागरः

आलेखपरिष्कारकः – परमानन्दझाः

टङ्कणसहायिका – गीताशर्माः

इयमाकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रवाचकः— बलदेवानन्दसागरः

## मुख्यवार्ताः

- भारतं लाओस–देशाय जलविद्युत्–सेचन–परियोजना–सहितानां मूलभूतसंरचनानां विकासार्थं भूयोऽपि ऋणानि प्रदातुं सहमतं संजातमस्ति।
- वर्षेऽस्मिन् जुलाईमासे औद्योगिकविकासः विगतवर्षीय–तुल्यावधेः अपेक्षया प्रायेण द्विगुणितो जातः।
- झारखण्डे दुमकाजनपदे काठीकुण्डा–रक्षिस्थानान्तर्गतं लालडीहक्षेत्रं निकषा अद्य नक्सल्विद्रोहिभिः सह संजाते संघर्षे एकः आरक्ष्यधिकारी वीरगतिं गतः, चत्वारश्चान्ये आरक्षिकार्मिकाः आहताः जाताः।
- अपि च

- गुजरातस्य कारासु धृतानां अष्टपञ्चाशन्मितानां पाकिस्तानीय–धीवराणां विमुक्त्यर्थं प्रशासनेन आदिष्टम्।

## राष्ट्रपतिः

भारतं लाओस–देशाय जलविद्युत्–सेचन–परियोजना–सहितानां मूलभूतसंरचनानां विकासार्थं भूयोऽपि ऋणानि प्रदातुं सहमतं संजातमस्ति। अद्य प्रातः लाओस–देशस्य राजधान्यां वेनटियाने–नगरे देशद्वयस्य राष्ट्रपत्योः प्रतिभापाटिल–चुमाली–सायासोनयोर्मध्ये संजाते समुपवेशने एतद्विषयको निर्णयो गृहीतः।

## औद्योगिक–विकासः

वर्षेऽस्मिन् जुलाईमासे औद्योगिकविकासः विगतवर्षीय–तुल्यावधेः अपेक्षया प्रायेण द्विगुणितो जातः। परञ्च, अपरत्र विद्युदुत्पादने अपचयो जातः। निर्माणोद्योगे वृद्धेः मितिः पूर्वावधेः अपेक्षया प्रतिशतं पञ्चदशमित्या एधितास्ति।

## नक्सल–संघर्षः

झारखण्डे दुमकाजनपदे काठीकुण्डारक्षिस्थानान्तर्गतं लालडीहक्षेत्रं निकषा अद्य नक्सल्विद्रोहिभिः सह संजाते संघर्षे एकः आरक्ष्यधिकारी वीरगतिं गतः, चत्वारश्चान्ये आरक्षिकार्मिकाः आहताः जाताः। आहताः लघुविमानेन रॉचीनगरमानीताः, एकश्च चिकित्सालये प्रवेशितः।

## ओबामा–भारतम्

अमेरिका–राष्ट्रपतिः बराक्–ओबामा नवम्बरमासे विधीयमानां स्वीयां भारतयात्रां सौत्सुक्यं प्रतीक्षते।

विदेशविभागस्य प्रवक्ता पी.जे.क्राउली वाशिंगटने विदेशि–वार्ताहरैः संभाषमाणः अवदत् यत् एतद्देशद्वयस्य पारस्परिकाः सम्बन्धाः अतितरां महत्त्वाधायिनो वर्तन्ते।

## लेह्–साहाय्यम्

जम्मूकश्मीरे लेहजनपदे मेघविभ्रंश–कारणात् समापन्नैः जलौघैः दुष्प्रभावितानां कृते क्षतिपूर्तिवितरणं सजवं प्रवर्तते। अस्यां प्राकृतिकापदि द्विशताधिकाः जनाः विगतप्राणाः जाताः।

# ईद्–पर्व

देशे ईद्–उल्–फितर्–पर्व श्वः आयोजयिष्यते। एतदर्थं सन्नह्यता सोत्साहं विधीयते। परञ्च केरलराज्ये रमजानस्य पवित्रमासस्य समाप्तौ अद्य ईद्–पर्व मान्यते। अद्य प्रातः परस्सहस्राः जनाः मोहम्मदीय–प्रार्थना–गृहेषु नमाजेति प्रार्थनामनुष्ठितवन्तः।

ईद्–पर्वणः पूर्वसन्ध्यावसरे राष्ट्रपतिः उपराष्ट्रपतिश्च जनेभ्यः शुभकामनाः प्रकटितवन्तौ।

स्वीयसन्देशे राष्ट्रपतिः श्रीमती प्रतिभादेवीसिंहपाटिलः अवदत् यत् पर्वेदं प्रसन्नताकरम् यतो हि अमुना जनेषु सहिष्णुता, तितिक्षा, सद्भावः बन्धुत्वं च समेधन्ते।

## ईद्–पर्वः – 2

उपराष्ट्रपतिः मोहम्मद–हामिद–अन्सारी आशां प्राकटयत् यत् पवित्रेऽस्मिन् अवसरे देशवासिनां जीवने सद्भावः सम्पन्नता प्रसन्नता च वर्धिष्यन्ते।

## पाकिस्तानीय–धीवराः

गुजरातस्य कारासु धृतानां अष्टपञ्चाशन्मितानां पाकिस्तानीय–धीवराणां विमुक्त्यर्थं प्रशासनेन आदिष्टम्। अधिकृत–विज्ञप्तेः अनुसारेण यदि पाकिस्तानीयधिकारिणः एतेषां बन्दिनां यात्रालेखपत्राणि प्रददति चेत्तदैव एते विमोच्यन्ते।

## वृष्टिः

उत्तराखण्डे सञ्जायमान–वृष्ट्या अपरमपि जनद्वयं मृतमिति सूच्यते।

तत्रान्तरे, राज्यस्य विभिन्नेषु स्थलेषु सीमामार्गसंघटनस्य जनपदप्रशासनस्य च कर्मकराः वृष्टिकारणात् मार्गोपरि एकत्रितम् अवकरम् अपाकुर्वन्ति।

।। इति वार्ताः ।।